Postal Regd.No. GAMC- 1553/2022-2024

**ISSN 2454-6313**

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २०६
जुलाई - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### आचारात् परं नास्ति

महात्मा गान्धी महापुरुषः आसीत् । सः अवतारः न आसीत् । एषः विचारः गान्धिवर्याय अपि रोचिष्यते । परं भारतीयेन मानसेन ज्ञायते यत् केभ्यश्चित् शतकेभ्यः अनन्तरं लोके तस्य पूजा भविष्यति । मन्दिराणां निर्माणम् अपि भविष्यति । गान्धिपुराणस्य आविष्कारः भविष्यति । एतत् सर्वं तस्मै महात्मने रोचिष्यते ? नैव । सामान्यतः कोऽपि महात्मा यदा मन्दिरेषु प्रतिष्ठां प्राप्नोति तदा एकं दूषणं प्रविशति । सः महात्मा पूजाविधेः केवलं साधनं भवति । तेन कृतस्य कर्मणः आचरणं लोकव्यवहारे न दृश्यते । दम्भी मनुष्यः महात्मनः पुरतः केवलं नीराजनं कृत्वा दुराचारे निमग्नः भवति । मनुष्यस्य एषा द्विमुखी प्रतिभा अथवा पटुता महापुरुषस्य कार्येषु नितरां कर्दमं सिञ्चति ।

कस्यचित् धनिकस्य विशाले भवने कश्चित् महाकायः शुनकः वसति । सः धनिकस्य वातानुकूलिते प्रकोष्ठे सुखेन शेते । गृहस्थाः शाकाहाराः वर्तन्ते, परन्तु शुनकस्य कृते मांस-पिण्डस्य व्यवस्था विधीयते । धनव्ययस्य तुलना क्रियेत चेत्, तावता धनेन दरिद्राणां त्रयः कुटुम्बाः प्राणयात्रां कर्तुं शक्नुयुः । तथापि धनिकः कृष्णभक्तः ! प्रत्यहं प्रभाते सः सकृष्णायाः धेनोः मूर्तेः नीराजनं करोति । किन्तु वराकः सः एकां जीवितां धेनुं गृहे पालयितुं न शक्नोति । अस्माकं कृष्णभक्तिः आचरणात् सुदूरे वंशवादनं करोति । अतः एव शुनकाः मांसम् आस्वादयन्ति, धेनवश्च आपणवीथिषु कागदानि चर्वन्ति ।

टॉल्स्टोयवर्यः कुत्रचित् महत्त्वपूर्णं विचारं प्रकटितवान् । सः ईसुक्रिस्तस्य परमः भक्तः आसीत् । सः कथयति – 'प्रभोः अस्तित्वेन एव ममापि अस्तित्वम् । अस्मिन् विचारे मम परमा श्रद्धा वर्तते, तथापि मया वचनीयं यत् ईसुः मानवः आसीत् । तस्मिन् परमेश्वरत्वेन कृतम् आरोपणम् अवमानाय कल्पते ।'

वस्तुतः धरणीतले अवतीर्णः प्रत्येकं पवित्रः मनुष्यः अवतारः एव । सर्वेषां कार्याणि उच्चावचानि भवितुम् अर्हन्ति । अस्मिन् अर्थे स्वक्षेत्रे वन्दनीयं कार्यं कृत्वा विलयं गताः सर्वे महात्मानः अनुसरणीयाः एव । अत्रापि रामकृष्णबुद्धमहावीरक्रिस्तादयः लोकहृदये विशेषतः विलसन्ति, तथापि व्यासः, भासः, कालिदासः, सोक्रेटिसः, आईन्स्टाईनः, राजा राममोहनरायः इत्यादयः बहवः प्रदीपाः एतं लोकमार्गं प्रकाशितवन्तः । अपि च असंख्यातनामानः नैके सत्पुरुषाः एतां धरां सनाथां कृतवन्तः । वयम् अपि संसारस्य कुटिलात् व्यवहारतन्त्रात् किञ्चित् अपसृत्य सत्कर्मणि प्रवृत्ताः भवेम । माघः लिखति – 'क्रिया केवलम् उत्तरम् ।'

## कृपापात्रता

✍ के. राजीवरेड्डिः

अवन्तीनगरस्य समीपे अरण्यप्रदेशः कश्चन आसीत्। तस्मिन् अरण्यप्रदेशे विद्यमाने ग्रामे माधवः धीरजः चेति उभौ सुहृदौ निवसतः स्म। तयोः गृहयोः मध्ये महत् अन्तरं न आसीत्।

तौ प्रतिदिनं प्रातः एव गृहात् निर्गत्य वनं गत्वा औषधमूलानि सङ्गृह्य अपराह्णे नगरं प्रति गच्छतः स्म। नगरे तानि वैद्येभ्यः विक्रीय, लब्धेन धनेन कुटुम्बस्य भरणं कुरुतः स्म।

तौ उभौ अपि परिश्रमशीलौ। माधवः महान् देवभक्तः आसीत्। कदाचित् भगवतः कृपाकटाक्षेण कष्टेभ्यः मम मुक्तिः भविष्यति इति स्वप्नं पश्यति स्म सः। सुखजीवनं यापयितुं भगवान् अवसरं दद्यात् इति चिन्तयति स्म अपि सः।

धीरजः अपि देवभक्तः एव। तथापि परोपकारे एव तस्य अधिका प्रवृत्तिः।

ग्रामवनयोः मध्ये काचित् नदी प्रवहति स्म। नद्याः तीरे निम्बकवृक्षस्य मूले किञ्चन देवीमन्दिरम् आसीत्। वनप्रवेशतः पूर्वं तौ भक्तिपूर्वकं देव्याः प्रणामं कुरुतः स्म। वनतः प्रत्यागमनसमये वने लब्धानि द्वित्राणि फलानि देव्यै समर्पयतः स्म। एवंप्रकारेण तयोः दिनानि यान्ति स्म।

कदाचित् वनतः प्रत्यागमनसमये मन्दिरस्य पुरतः ताभ्यां कश्चन अन्धः वृद्धः दृष्टः। बुभुक्षाकारणेन बलहीनतया च उत्थातुम् अशक्तः आसीत् सः। तस्य वृद्धस्य एतां स्थितिं दृष्ट्वा खिन्नः धीरजः अनुक्षणं तस्मै जलं दत्त्वा तदीयां पिपासां निवारितवान्। तदनन्तरं सः तस्मै खादितुं कतिचन फलानि दत्त्वा नगरदिशि प्रस्थितवान्।

अन्धस्य वृद्धस्य साहाय्यं किमपि न कृतम् माधवेन। वृद्धस्य दयनीयां स्थितिं दृष्ट्वा अपि तेन कापि दया न दर्शिता। भक्तिपूर्वकं देवीं प्रणम्य नगरं प्रति प्रस्थितवान् सः।

अनन्तरदिने अपि सः अन्धः वृद्धः तत्रैव दृष्टः। धीरजः स्वेन आनीतासु रोटिकासु द्वयं तस्मै दत्तवान्। वनतः आगत्य फलानि अपि दत्त्वा ततः गतवान्।

तृतीयं दिनम् अपि सम्प्राप्तम्। तद्दिने सायं धीरजस्य गृहस्य पृष्ठभागे स्थितः धेनुबन्धनस्तम्भः पतितः अभवत्। अतः धीरजः पूर्ववत् तं स्तम्भं निखनितुं भूमौ गर्तं कृतवान्। तदा तेन लोहपात्राघातध्वनिः श्रुतः। पुनरपि खननं यदा कृतं तदा तत्र ताम्रघटः कश्चन लब्धः। तस्मिन् बहूनि सुवर्णनाणकानि आसन्। 'एतत् सर्वं देवीकृपया सञ्जातम्। इतः परम् अहं सुखेन जीवितुं शक्नुयाम्' इति अचिन्तयत् सः।

तदनन्तरदिने प्रातः धीरजः वृद्धेन मेलितुं रोटिकाः स्वीकृत्य गतवान्। तत्र तेन सः वृद्धः न दृष्टः। अतः सः देवीपूजां कृत्वा गृहम् आगतवान्।

गर्ते प्राप्तेन धनेन तेन भूमिः क्रीता, कृषिः च आरब्धा। तदा तदा वनं गत्वा मूलानि सङ्गृह्य नगरे विक्रयणम् अपि करोति स्म सः। एवं सुखेन गतानि तदीयानि दिनानि।

एतत् सर्वं दृष्ट्वा महत् आश्चर्यं प्राप्तवान् माधवः। कदाचित् सः वनतः आगच्छन् नद्यां पादादिकं प्रक्षाल्य देवीमन्दिरस्य पुरतः उपविश्य उक्तवान् – ''अम्ब ! अहम् अपि भक्तिपूर्वकं पूजां कुर्वन् एव अस्मि। तथापि मयि भवत्या कृपा न दर्शिता। किम् अग्रे अपि मया एवम् एव कष्टमयं जीवनं यापनीयं भविष्यति ?'' इति।

निराशः सः श्रान्तः सन् तत्रैव सुप्तवान्। तदा तस्य स्वप्ने देवी आगत्य उक्तवती – ''मयि भवतः अपि श्रद्धा भक्तिः च अस्ति एव। तेन अहं प्रसन्ना। किन्तु निश्शक्तजनानां विषये आदरः दया वा नास्ति भवतः। वराकस्य अन्धस्य वृद्धस्य साहाय्यं न कृतं भवता। केवलेन मम पूजनेन किम् ? भवादृशानां कृते सम्पद् दत्ता चेत् कः लाभः भवेत् समाजस्य ? धीरजसदृशेभ्यः दत्ता सम्पत् निर्गतिकानां साहाय्याय विनियुक्ता भवेत्। अतः एव सः सम्पदः दानेन अनुगृहीतः मया'' इति।

माधवः देव्याः वचनानि श्रुत्वा आश्चर्यम् अनुभवन् जागरणं प्राप्य दीनस्वरेण – ''मातः ! भवत्या मम बुद्धिमान्द्यं निवार्य नेत्रोद्घाटनं कृतम्। अग्रे एतादृशं दोषम् अहं न आचरिष्यामि। दुर्बलानां साहाय्यम् अहम् अवश्यं करिष्यामि'' इति उक्त्वा सश्रद्धं देवीं प्रणम्य गृहं प्रति प्रस्थितवान्।

## मूकजीविनः साक्ष्यम्

सुधामपुरे भीमः नाम कश्चन कृषिकः वसति स्म। सः स्वस्य क्षेत्रे कूष्माण्डलताः आरोपितवान् आसीत्। कूष्माण्डाः यदा प्रवर्धन्ते तदा तान् कुशलपुरं नीत्वा विक्रीणीते स्म सः। कदाचित् सः क्षेत्ररक्षकं कलेशम् अवदत् – ''अद्य अहं मम बन्धोः दर्शनाय नगरान्तरं गच्छन् अस्मि। मासानन्तरम् एव प्रत्यागमनं भवेत्। अतः क्षेत्ररक्षणं जागरूकतया करोतु'' इति।

भीमस्य निर्गमनानन्तरं कलेशः तदा तदा दशद्वादश कूष्माण्डान् स्वस्य वृषभशकटे आरोप्य पुत्रस्य द्वारा नगरे विक्रयणं कारयति स्म।

मासानन्तरं भीमः प्रत्यागतः। क्षेत्रदर्शनात् एव तेन अवगतं यत् क्षेत्रे कूष्माण्डफलेषु न्यूनता दृश्यते इति। कलेशेन एव एतत् चौर्यं कृतम् इति निर्णीतं तेन। चौर्यस्य अभिज्ञानाय तेन कश्चन उपायः चिन्तितः।

अनन्तरदिने सः कलेशम् अवदत् – ''श्वः प्रातः एव भवान् भवदीयं वृषभशकटं मम गृहं प्रति प्रेषयतु। कूष्माण्डाः नगरं प्रति प्रेषणीयाः सन्ति'' इति। अनन्तरदिने कलेशः शकटम् आनीतवान्। पञ्चविंशतिं कूष्माण्डान् शकटे आरोप्य भीमः कलेशम् अवदत् – ''मम आरोग्यं सम्यक् नास्ति। मार्गः अपि असमीचीनः। अतः शकटः मन्दगत्या गच्छतु'' इति। कलेशः एतत् अङ्गीकृत्य मन्दगत्या शकटम् अचालयत्। नगरे कस्यचित् आपणस्य पुरतः शकटः स्थगितः। आपणिकः कलेशम् अवदत् – ''पूर्वं भवता दशद्वादश एव कूष्माण्डाः आनीयन्ते स्म। अद्य कथम् अधिकतया आनीताः ?'' इति।

एतस्मात् कलेशस्य चौर्यम् अभिज्ञातम् अभवत्। भीमः तम् अवदत् – ''सर्वदा यत्र गम्यते तत् स्थलं प्रति एव शकटं नयतः वृषभौ। मूकजीविनां साक्ष्यं कदापि अवितथं न भवति। चोरः भवान् इदानीम् एव उद्योगात् निष्कासितः अस्ति मया'' इति।

## अविमारकम् ( ग्रन्थपरिचयः )

व्योम शाहः

( अनुवर्तते )

एतावता अङ्कत्रये अस्माभिः दृष्टं यत् – वने मत्तगजतः कुरङ्गीं रक्षन् अविमारकः तस्यामेव कुरङ्ग्याम् अनुरक्तः । कुरङ्ग्याः अपि तादृशी एव स्थितिः । मत्तगजेन कृतस्य प्रहारस्य विषये विज्ञाय महाराजः कुन्तिभोजः अविमारकस्य अन्वेषणं कर्तुम् आदिशति मन्त्रिणे । कदाचित् कुरङ्ग्याः चेटी – ननिका अविमारकं कन्यान्तःपुरस्य रक्षकाणां गमनस्य विषये गुप्तं सूचनं प्रददाति । मध्येरात्रम् अविमारकः प्रच्छन्नवेषेण प्रासादम् आरोढुं प्रारब्धवान् । चन्द्रस्य ज्योत्स्नया प्रकाशितस्य नगरस्य शोभां दृष्ट्वा सः विस्मितः। इतश्च कुरङ्गी अविमारकस्य स्मरणं कुर्वती शयनं कृतवती । ननिकां तत्रैव दृष्ट्वा अविमारकः सन्तुष्टः । तयोः संवादेन कुरङ्गी उत्थिता विस्मिता च । ततः तौ प्रणयिनौ अभ्यन्तरमण्डपं शयनार्थं गतवन्तौ ।

चतुर्थाङ्कस्य प्रवेशके मागधिका–नलिनिकयोः परस्परसंलापेन ज्ञायते यत् कुरङ्ग्या सह अविमारकस्य सहवासस्य वर्षमेकं सम्पन्नम् । अविमारकस्तु गतः किन्तु न शक्नोति कुरङ्गी तेन विना क्षणम् अपि स्थातुम् । ताः चेट्यः कुरङ्ग्याः अवस्थां द्रष्टुं न शक्नुवन्ति ।

ततः अङ्कस्य प्रारम्भे शोकाकुलः अविमारकः प्रविशति । सः कथञ्चित् ततः नीरुजः निर्गतः इत्येव वरं मन्यते । सः कुरङ्ग्याः अवस्थां विचिन्त्य चिन्ताकुलः भवति । कुरङ्ग्याः विरहेण उत्कण्ठितः सः प्राणान् त्यक्तुम् इच्छति । सः चिन्तयति यत् सः अरण्यस्थ–तडागे मङ्क्त्वा प्राणान् त्यक्ष्यति, किन्तु विधिवशात् मार्गं विस्मरति । तत्रैव अरण्ये सः दावाग्निं पश्यति । तत्र गत्वा सः आत्मनः आहुतिं दत्ते किन्तु अग्निः तं न दहति । सः कथयति –

**''अग्निर्दयां कुरुते मदनातुरेऽति पुत्रं पितेव च परिष्वजति प्रहृष्टः ॥''**

सः इतोऽपि प्राणान् त्यक्तुं यतते । सः एकं शैलं पश्यति ''तं शैलम् आरुह्य ततः प्रपातेन प्राणान् त्यक्ष्यामि'' इति चिन्तयति । सः आरोहणं कृत्वा पर्वतशिखरं प्राप्नोति ।

तदानीं कश्चित् विद्याधरः तस्य प्रियया सह विमानात् तमेव शैलशिखरम् अवतीर्णः । तौ तत्र विश्रामं कर्तुं निर्णयं कुरुतः । तदा सः अविमारकं पश्यति । अविमारकस्य रूपं दृष्ट्वा सः निश्चितः यद् अयं मन्त्रभ्रष्टः विद्याधरः एव । यतः तादृशं रूपं मनुष्येषु न सम्भवति । मृत्यवे सज्जस्य अविमारकस्य दृष्टिपातः विद्याधरे भवति । सः विद्याधरस्य कुलम् अन्वयं च पृच्छति । विद्याधरोऽपि यथोचितं स्वकीयं परिचयं ददाति । सः अविमारकं तदीयं परिचयं पृच्छति । स्वकीये अन्तकाले अनृतं वदितुम् अनिच्छन् सः कथयति यत् सः एव सौवीरराजपुत्रः अविमारकः । विद्याधरः तस्मिन् न विश्वसिति । स तं पृच्छति यत् किमर्थं सः तत्र तिष्ठति ? अविमारकः निरुत्तरीभूय अधोमुखं तिष्ठति । विद्याधरः स्वकीयया विद्यया सर्वमपि वृत्तान्तं जानाति । सः भगवतः अग्नेः पुत्रः इति तेन ज्ञायते । विद्याधरः अविमारकेण सख्यं तनोति । सः तस्मै एकम् अङ्गुलीयकं ददाति यदीय–साहाय्येन सः अज्ञातमेव कन्यापुरं प्रवेष्टुं शक्नुयात् । वामाङ्गुल्या अङ्गुलीयकं धारयन् पुरुषः प्रकृतिस्थः भवति, दक्षिणाङ्गुल्या च धारयन् अदृश्यः । विद्याधरः तस्य प्रयोगं कर्तुं पाठयति । अङ्गुलीयकस्य प्रभावः तावान् यद् छायाऽपि न दृश्यते । अङ्गुलीयकं गृहीत्वा अविमारकः स्वकीयाम् अनुगृहीततां प्रकटीकरोति । तदा विद्याधरः एकेन श्लोकेन सुपात्र–दानस्य महत्त्वं कथयति –

**न तथा रत्नम् आसाद्य सुजनः परितुष्यति ।**
**यथा तत् तद्गताकाङ्क्षे पात्रे दत्त्वा प्रहृष्यति ॥**


(क्रमशः... )


## मासवार्ता:

**आरब्धः "Value Education through Sanskrit बालसंस्कृतवर्गः" इति अभ्यासक्रमः ।**

बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य–संस्कृत–एकेडेमीसंस्थानेन "Value Education through Sanskrit बालसंस्कृतवर्गः" इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ९ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः, व्यक्तित्वविकासश्च वर्धिष्यन्ते । अत्र उल्लेखनीयं यत् बालैः सह तेषाम् अभिभावकानां कृते अपि संस्कृताध्यापनस्य व्यवस्था संस्थानेन कल्पितास्ति । श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुलः व्यासः, श्रीरागिणी गोवाडिया, श्रीऋषिकेशः उपाध्यायः च छात्रान् पाठयिष्यन्ति । अभ्यासक्रमोऽयं मार्चमासपर्यन्तं प्रवर्तिष्यते ।







## कृपया हसन्तु

रमणः - (नमनम् उद्दिश्य) भोः नमन ! सर्वे जनाः मासे एकवारं मम पितुः समीपम् आगत्य स्वस्य शिरः नमयन्ति ।

नमनः - (आश्चर्येण) भोः नमन ! किं तव पिता कश्चन मन्त्री अस्ति वा ?

रमणः - न, न, मम पिता तु नापितः वर्तते ।

नापितः- barber

★ ★ ★ ★ ★

नमनः - (मातरम् उद्दिश्य) भोः मातः ! अद्य अहं विद्यालयं न गमिष्यामि ।

माता - किं जातम् ? त्वं किमर्थं विद्यालयं गन्तुं न इच्छसि ?

नमनः - किं करवाणि मातः ? मम शिक्षकः स्वयं तु पुस्तकं दृष्ट्वा पाठयति, किन्तु मह्यं कथयति यत् - "पुस्तकम् अदृष्ट्वा कवितां श्रावय" इति ।

★ ★ ★ ★ ★

वैद्यः - (रमां परीक्ष्य) भवत्याः कापि समस्या नास्ति । केवलं विश्रामस्य आवश्यकता वर्तते । अतः विश्रामं करोतु ।

रमा - किन्तु भवता मम जिह्वा तु नावलोकिता एव ?

वैद्यः - तस्यै अपि विश्रामस्य आवश्यकतास्ति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**नरस्याभरणं रूपं रूपस्याभरणं गुणः ।**
**गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥**

**तात्पर्यम्** – नरस्य आभरणं रूपम् अस्ति। रूपस्य आभरणं गुणः वर्तते। गुणस्य आभरणं ज्ञानम् अस्ति। ज्ञानस्य आभरणं क्षमा भवति।

**नवनीतोपमा वाणी करुणा कोमलं मनः ।**
**धर्मबीजप्रसूतानाम् एतत् प्रत्यक्षलक्षणम् ॥**

**तात्पर्यम्** – नवनीतवत् मृदु वचनं, दयया युक्तं मृदु मनः च इत्येते धर्मात्मनां प्रत्यक्षलक्षणे वर्तेते।

**नहीदृशं संवननं त्रिषु लोकेषु विद्यते ।**
**दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥**

**तात्पर्यम्** – करुणा, स्नेहः, दानं, मधुरं वचनम् इत्येतेषां समानम् आकर्षणशक्तियुतं वस्तु जगति नान्यत् किमपि विद्यते।

**नाभिषेको न संस्कारः सिंहस्य क्रियते वने ।**
**विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥**

**तात्पर्यम्** – सिंहस्य संस्कारपूर्वकम् अभिषेकः केनापि न कृतः। स्वस्य पराक्रमेण एव सः पशूनां पतिः जातः अस्ति। इदं स्वतः सिद्धरूपेणैव सिंहेन प्राप्तमस्ति।

## ज्ञानसरित्

श्यामः पटेलः

**कृष्णवर्णीयः हंसः !**



शीर्षकं पठित्वा किं चिन्तितं भवद्भिः ? सरस्वत्याः वाहनं हंसः तु श्वेतवर्णीयः भवति । तत्र कृष्णवर्णीयः हंसः कुतः ? सत्यमस्ति, हंसः अपि कृष्णः भवति । ओस्ट्रेलियादेशे तथा च न्यूझिलेण्डदेशे प्राप्यन्ते एतादृशाः कृष्णहंसाः ।

एतेषां कृष्णहंसानां ग्रीवा श्वेतहंसानां ग्रीवायाः अपेक्षया सुदीर्घा भवति । तस्याः ग्रीवायाः आकृतिः अवग्रहः (ऽ) इव वक्रा भवति । कृष्णहंसानां पादद्वयं चञ्चुः च कृष्णवर्णस्य एव भवति । युवानः हंसाः त्रि–फुटमिततः चतुर्फुटमितपर्यन्तम् औन्नत्यं विदधति । तथा च तेषां पिच्छानां परिधिः द्विफुटमितः भवति । तेषां ध्वनिः ब्यूगलवाद्यमिव कर्णप्रियः वर्तते । यदा आकाशे पङ्क्तिबद्धाः भूत्वा एते डयमानाः भवन्ति तदा तेषां कृष्णत्वं रमणीयतां तनोति । डयनकाले एते स्वीयां वक्रीभूतां ग्रीवां समरेखां कुर्वन्ति । एते नद्याः सरसः तडागस्य च तीरे गाधजले वा नीडं निर्माय निवसन्ति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **कर्दमः** | कीचड़ | mud |
| **पङ्कग्राहः** | मकर | crocodile |
| **पङ्केजम्** | कमल | lotus |
| **भेकः** | मेंढक | frog |
| **उत्पलम्** | नील कमल | blue lotus |
| **पल्लवः** | नया पत्ता | new leaf |
| **तरङ्गिणी** | नदी | river |
| **सरित्पतिः** | समुद्र | ocean |
| **चक्रवातः** | चक्रवात | cyclone |
| **विपर्ययः** | विपरीत | contrariety |
| **प्रत्यासन्नः** | निकटवर्ती | near |
| **प्रत्यूषः** | सुबह | morning |
| **प्रतीहारः** | द्वार | door |
| **प्रतीनाहः** | पताका | flag |
| **मुरली** | बांसुरी | flute |

## किं भवन्तः जानन्ति ?

**१ ) दिगम्बरश्वेताम्बराम्नायौ केन धर्मेण सह सम्बद्धौ स्तः ?**

(क) बौद्धधर्मेण (ख) सिखधर्मेण (ग) जैनधर्मेण (घ) पारसीधर्मेण

**२ ) सम्राजः अशोकस्य पितुः नाम किम् आसीत् ?**

(क) अजातशत्रुः (ख) चन्द्रगुप्तः (ग) समुद्रगुप्तः (घ) बिन्दुसारः

**३ ) सम्राजः अशोकस्य सम्बन्धः एतेषु केन शासकेन सह आसीत् ?**

(क) धनानन्देन (ख) चन्द्रगुप्तेन (ग) सिकन्दरेण (घ) पोरसेण

**४ ) एतासु का देवी विद्यायाः बुद्धेः च प्रतीकं मन्यते ?**

(क) लक्ष्मीः (ख) दुर्गा (ग) सरस्वती (घ) पार्वती

**५ ) एतासु का देवी वित्तस्य प्रतीकं मन्यते ?**

(क) दुर्गा (ख) सरस्वती (ग) पार्वती (घ) लक्ष्मीः

**६ ) एतेषु कः देवः विध्वंसस्य प्रतीकं वर्तते ?**

(क) ब्रह्मा (ख) शिवः (ग) इन्द्रः (घ) विष्णुः

**७ ) एतेषु कः देवः विवेकस्य प्रतीकं वर्तते ?**

(क) विष्णुः (ख) कार्तिकेयः (ग) शिवः (घ) गणेशः

उत्तराणि – (१) ग (२) घ (३) ख (४) ग (५) घ (६) ख (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

## स्तोत्रपाठः

**( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च )**

**Date** : 13/07/2023 to 15/08/2023
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

## स्तोत्रपाठः

**( मातृपूजनम्, शक्रादयस्तुतिः च )**

**Date** : 12/09/2023 to 12/10/2023
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક **એકલવ્ય સંસ્કૃત એકેડેમી** દ્વારા આયોજિત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006

ततः विद्याधरः तस्य प्रियया सह गतः। अविमारकः निश्चयं करोति यत् सः पुनरपि नगरं गमिष्यति। श्रान्तः सः शिलातले विश्रम्य सन्तुष्टस्य विदूषकस्य अवस्थां चिन्तयति। विदूषकः अविमारकं मृगयमाणः वनं प्रविष्टः।

दैवयोगेन तयोः मेलनं भवति। अविमारकः विद्याधरेण दत्तस्य अङ्गुलीयकस्य प्रभावं दर्शयति। विदूषकः आश्चर्य चकितः। तौ नगरं गतौ।

पञ्चमाङ्कस्य प्रारम्भे कुरङ्गी नलिनिका च कन्यान्तःपुरे तिष्ठन्त्यौ बहिः पश्यतः। अविमारकः तां दृष्ट्वा विरहाकूलः सन् आरोहति प्रासादम् अदृश्यः सन्। कुरङ्गी भीता, अविमारकं च दृष्ट्वा विस्मिता। मध्ये तावत् सन्तुष्ट–नलिनिकयोः अत्यन्तविनोदी संवादः भवति। कुरङ्गी अविमारकः च सुखेन तत्र निवसतः। षष्ठे अङ्के कुन्तिभोजः सौवीरराजः आर्यभूतिकः च प्रविशन्ति। कुन्तिभोजः सौवीरराजं दुःखितं दृष्ट्वा कारणं पृच्छति। सः कथयति यत् चण्डभार्गवनाम्ना ऋषिणा ते शापिताः। तस्मात् तैः वर्षं यावत् चाण्डालवत् वर्तितव्यम् अभवत्। 'क्लेशेन मृगयमाणेऽपि विष्णुसेनः (अविमारकः) न कुतश्चित् प्राप्तः।' इति भूतिकः निवेदयति। ततः देवर्षिः नारदः प्रविशति। प्रार्थ्यमाने राजभ्यां देवर्षिः कथयति यत् विष्णुसेनः कुङ्ग्या सह एव गान्धर्वेण विवाहेन कृतोद्वाहः। ततः सः सर्वम् अपि वृत्तान्तं विष्णुसेनसम्बन्धिन कथयति। सर्वे सन्तुष्टाः। ततः परिजनतोषार्थं ते विवाहं कारयन्ति। अविमारकः सर्वान् स्वजनान् अभिवादयति। नाटकस्य समाप्तिः भरतवाक्येन भवति – भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।'

इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः॥

– मुख्य–स्रोतसः कृतानि परिवर्तनानि –

– इदं वृत्तान्तं तात्कालिकमेव भासेन गृहीतं, बृहत्कथायाम् अथवा कथासरित्सागरे तस्य आलेखनम् अभवत् इति विदुषाम् अभिप्रायः॥

इयं लौकिकी कथा इव भाति।

इत्यलं विस्तरेण।